# Shri ShivanirajanastotraM

# श्रीशिवनीराजनस्तोत्रम्

## Document Information

Text title : Shiva Nirajanastotram

File name : shivanIrAjanastotram.itx

Category : shiva, AratI

Location : doc_shiva

Transliterated by : Madhura Bal madhurabal11 gmail.com

Proofread by : Madhura Bal madhurabal11 gmail.com

Latest update : August 19, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# श्रीशिवनीराजनस्तोत्रम्

ॐ नमः शिवाय ।
जय गङ्गाधर हर शिव जय गिरिजाधीश
शिव जय गौरीनाथ त्वं मां पालय नित्यं
त्वं मां पालय शम्भो कृपया जगदीश ॥

ॐ हर हर हर महादेव ॥

पारिजातहरिचन्दनकल्पद्रुमनिचयैः शिव कल्प०
कुसुमितलतावितानैर्गुञ्जद्भ्रमरमयैः ।
उन्मदकोकिलकूजितशिखिकेकारुचिरैः हर शिखि०
सहकारैश्च कदम्बे २ भृङ्गवधूमुखरैः ॥ १॥

ॐ हर हर हर महादेव ॥

मुदितहंसयुगखेलत्सारसपरिवारैः शिव सार०
भ्रमरयुवतिमुखराम्बुज २ सुभगैः कासारैः ।
हारिणि कलधौताद्रेर्देशे मणिरचिते हर देशे०
भवने सुखमासीनं २ चिन्तामणिनिचिते ॥ २॥

ॐ हर हर हर महादेव ॥

पीठे गिरिजासहितं चन्द्रकलाधवलं शिवमिन्दुक०
विशरणशरणं देवं २ विपत्क्षयप्रबलम् ।
सम्पद्विधानरसिकं जगदङ्कुरकन्दं हर जग०
प्रणमामो वयमीशं २ चित्परमानन्दम् ॥ ३॥

ॐ हर हर हर महादेव ॥

यस्याग्रेस्मरवध्वो विबुधाधिपसहिताः शिव विबु०
मुदितमनोहरवेषा २ लास्यकलामहिताः ।
ताथै ताथै तथेति विविधं नृत्यन्ति हर विविधं-

किङ्किणिनूपुरशिञ्जित २ रुचिरं वल्गन्ति ॥ ४॥

ॐ हर हर हर महादेव ॥

तान्धिक धिनकित्थथेति विविधं वादयते शिव विविधं-
मृदङ्गममरी काचित् २ रुचिरं नादयते ।
वीणां काचिद्रमणी गानविदाभरणा हर गान०
गायति कलमपराचित् २ चिन्तितहरचरणा ॥ ५॥

ॐ हर हर हर महादेव ॥

रमया सहितो विष्णुर्ब्रह्मा सावित्र्या शिव ब्रह्मा०
जिष्णुर्नृत्यति भक्त्या २ मुदितमनाः शच्या ।
तुम्बुरुरुचितं मुरजं विविधं वादयते हर विविधं०
नारदमुनिरपि वीणां २ महतीं नादयते ॥ ६॥

ॐ हर हर हर महादेव ॥

तं प्रसन्नवदनं प्रभुमिन्दुकलाभरणं शिवमिन्दु०
प्रणमामः करुणाब्धिं २ तापत्रयहरणम् ।
देवासुरमणिमुकुटैर्नीराजितचरणं हर नीरा०
भक्ताभीष्टदकल्पं २ कातरजनशरणम् ॥ ७॥

ॐ हर हर हर महादेव ॥

जटाकिरीटे गङ्गां चन्द्रकलां भाले शिवमिन्दुकलां०
नेत्रेष्विन्दुशिखीना २ नधरे स्मितममले ।
कण्ठे गरलं पाणौ वरमभयं शूलं हर वर०
पीयूषं कटिदेशे २ कृत्तिं च दुकूलम् ॥ ८॥

ॐ हर हर हर महादेव ॥

श्रीगिरिराजकिशोरीमङ्के निदधानं शिवमङ्के०
निखिलसुरासुरमौलीन् २ चरणेऽमितदानम् ।
शम्भुं तडिदभिगौरं कृतनागाभरणं हर कृत०
भजति स गच्छति मुक्तिं २ तिमिरापाकरणम् ॥ ९॥

ॐ हर हर हर महादेव ॥

निरुपधिकरुणासिन्धुर्भीतत्राणपरः शिव भीत०

दुःखक्षतये भूयात् २ कातरबन्धुवरः ।
यः श्वेतं यमभीतं स्मृतमात्रोऽरक्षत् हर स्मृतमा०
मा भैषीरिति वादी २ कालं समतक्षत् ॥ १०॥

ॐ हर हर हर महादेव ॥

आनन्दाय महेशो युष्माकं भवतात् शिव युष्माकं०
जन्मजरामृतिशोकात् २ करुणानिधिरवतात् ।
येन सुरासुरनिवहस्त्रातो विषभीतो हर त्रातो-
नीलकण्ठ इति भूयो २ निगमगणैर्गीतः ॥ ११॥

ॐ हर हर हर महादेव ॥

यः सृष्ट्यादिविधानं ब्रह्माच्युतरुद्रैः शिव ब्रह्मा-
निजरूपैस्तनुते यो २ दुर्ज्ञेयः क्षुद्रैः ।
तं प्रकाशसुखमच्छं बाधावधिमीशं हर बाधा०
तनुभेदैरिव भिन्नं २ श्रयत धियामीशम् ॥ १२॥

ॐ हर हर हर महादेव ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

इति श्रीहृषीकेशकैलासनिवासिविद्वद्वरिष्ठब्रह्मनिष्ठपरमहंस-
परिव्राजकाचार्य्य १०८ श्रीमत्स्वामिप्रकाशानन्दपुरी-
भिर्विनिर्मितं शिवनीराजनस्तोत्रं सम्पूर्णम् ॥

The Arati is sung in the tune of well known
jaya jagadIsha hare Arati. The 0 at the end
refers to the implied repetition, for example
कल्पद्रुमनिचयैः शिव कल्प० means
कल्पद्रुमनिचयैः शिव कल्पद्रुमनिचयैः
With other repetion
किङ्किणिनूपुरशिञ्जित २ रुचिरं वल्गन्ति means
किङ्किणिनूपुरशिञ्जित किङ्किणिनूपुरशिञ्जित रुचिरं वल्गन्ति

Proofread by Madhura Bal madhurabal11 gmail.com

*Shri ShivanirajanastotraM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*